ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

ह॒रिः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## पञ्चम काण्डे तृतीय प्रश्नः

# Table of Contents

5 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः ..................................... 3

5.3 पञ्चम काण्डे तृतीय प्रश्नः – चितीनाम् निरूपणं ........................ 3

==============================

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

## 5 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

### 5.3 पञ्चम काण्डे तृतीय प्रश्नः – चितीनाम् निरूपणं

**TS 5.3.1.1 - Kramam**

उथ्सन्नयज्ञो वै । उथ्सन्नयज्ञ इत्युथ्सन्न – यज्ञः । वा एषः ।

एष यत् । यदग्निः । अग्निः किम् । किम् वा । वाऽह । अहैतस्य ।

एतस्य क्रियते । क्रियते किम् । किम् वा । वा न । न यत् । यद् वै ।

वै यज्ञस्य । यज्ञस्य क्रियमाणस्य । क्रियमाणस्यान्तर्यन्ति ।

अन्तर्यन्ति पूयति । अन्तर्यन्तीत्यन्तः–यन्ति । पूयति वै । वा अस्य ।

अस्य तत् । तदाश्विनीः । आश्विनीरुप । उप दधाति । दधात्यश्विनौ ।

अश्विनौ वै । वै देवानाम् । देवानाम् भिषजौ । भिषजौ ताभ्याम् ।

ताभ्यामेव । एवास्मै । अस्मै भेषजम् । भेषजम् करोति । करोति

पञ्च । पञ्चोप । उप दधाति । दधाति पाङ्क्तः । पाङ्क्तो यज्ञः ।

यज्ञो यावान् । यावानेव । एव यज्ञः । यज्ञस्तस्मै । तस्मै भेषजम् ।

भेषजम् करोति । करोत्यृतव्याः । ऋतव्या उप । उप दधाति ।
दधात्यृतूनाम् । ऋतूनाम् क्लृप्त्यै । क्लृप्त्यै पञ्च । **1 (50/52)**

**TS 5.3.1.2 - Kramam**

पञ्चोप । उप दधाति । दधाति पञ्च । पञ्च वै । वा ऋतवः ।
ऋतवो यावन्तः । यावन्त एव । एवर्तवः । ऋतवस्तान् । तान्
कल्पयति । कल्पयति समानप्रभृतयः । समानप्रभृतयो भवन्ति ।
समानप्रभृतय इति समान – प्रभृतयः । भवन्ति समानोदर्काः ।
समानोदर्कास्तस्मात् । समानोदर्का इति समान – उदर्काः ।
तस्माथ् समानाः । समाना ऋतवः । ऋतव एकेन । एकेन पदेन ।
पदेन व्यावर्तन्ते । व्यावर्तन्ते तस्मात् । व्यावर्तन्त इति वि–आवर्तन्ते ।
तस्मादृतवः । ऋतवो व्यावर्तन्ते । व्यावर्तन्ते प्राणभृतः । व्यावर्तन्त
इति वि – आवर्तन्ते । प्राणभृत उप । प्राणभृत इति प्राण – भृतः ।
उप दधाति । दधात्यृतुषु । ऋतुष्वेव । एव प्राणान् । प्राणान् दधाति ।
प्राणानिति प्र – अनान् । दधाति तस्मात् । तस्माथ् समानाः ।
समानाः सन्तः । सन्त ऋतवः । ऋतवो न । न जीर्यन्ति ।
जीर्यन्त्यथो । अथो प्र । अथो इत्यथो । प्र जनयति । जनयत्येव ।

एवैनान् । एनानेषः । एष वै । वै वायुः । वायुर् यत् । यत् प्राणः ।
प्राणो यत् । प्राण इति प्र – अनः । यदृतव्याः । ऋतव्या उपधाय ।
उपधाय प्राणभृतः । उपाधायेत्युप – धाय । प्राणभृत उपदधाति ।
प्राणभृत इति प्राण – भृतः । **2** (**50/60**)

**TS 5.3.1.3 - Kramam**

उपदधाति तस्मात् । उपदधातीत्युप – दधाति । तस्माथ् सर्वान् ।
सर्वानृतून् । ऋतूननु । अनु वायुः । वायुरा । आ वरीवर्ति । वरीवर्ति
वृष्टिसनीः । वृष्टिसनीरुप । वृष्टिसनीरिति वृष्टि–सनीः । उप दधाति ।
दधाति वृष्टिम् । वृष्टिमेव । एवाव । अव रुन्धे । रुन्धे यत् ।
यदेकधा । एकधोपदद्ध्यात् । एकधेत्येक – धा । उपदद्ध्यादेकम् ।
उपदद्ध्यादित्युप – दद्ध्यात् । एकमृतुम् । ऋतुम् ँवर्.षेत् ।
वर्.षेदनुपरिहारम् । अनुपरिहारꣳ सादयति ।
अनुपरिहार मित्यनु–परिहारम् । सादयति तस्मात् । तस्माथ् सर्वान् ।
सर्वानृतून् । ऋतून् वर्.षति । वर्.षति यत् । यत् प्राणभृतः ।
प्राणभृत उपधाय । प्राणभृत इति प्राण–भृतः । उपधाय वृष्टिसनीः ।

उपधायेत्युप - धाय । वृष्टिसनीरुपदधाति । वृष्टिसनीरिति

वृष्टि - सनीः । उपदधाति तस्मात् । उपदधातीत्युप - दधाति ।

तस्माद् वायुप्रच्युता । वायुप्रच्युता दिवः । वायुप्रच्युतेति

वायु - प्रच्युता । दिवो वृष्टिः । वृष्टिरीर्ते । ईर्ते पशवः । पशवो वै ।

वै वयस्याः । वयस्या नानामनसः । नानामनसः खलु । नानामनस

इति नाना - मनसः । खलु वै । वै पशवः । पशवो नानाव्रताः ।

नानाव्रतास्ते । नानाव्रता इति नाना - व्रताः । तेऽपः । अप एव ।

एवाभि । अभि समनसः । समनसो यम् ।

समनस इति स - मनसः । 3 (50/63)

**TS 5.3.1.4 - Kramam**

यम् कामयेत । कामयेतापशुः । अपशुः स्यात् । स्यादिति ।

इति वयस्याः । वयस्यास्तस्य । तस्योपधाय । उपधायापस्याः ।

उपधायेत्युप - धाय । अपस्या उप । उप दद्ध्यात् ।

दद्ध्यादसम्(2)ज्ञानम् । असम्(2)ज्ञानमेव ।

असम्(2)ज्ञानमित्यसम् - ज्ञानम् । एवास्मै । अस्मै पशुभिः ।

पशुभिः करोति । पशुभिरिति पशु-भिः । करोत्यपशुः । अपशुरेव ।

एव भवति । भवति यम् । यम् कामयेत । कामयेत पशुमान् ।
पशुमान्थ् स्यात् । पशुमानिति पशु–मान् । स्यादिति । इत्यपस्याः ।
अपस्यास्तस्य । तस्योपधाय । उपधाय वयस्याः ।
उपधायेत्युप – धाय । वयस्या उप । उप दद्ध्यात् ।
दद्ध्याथ् सम्(2)ज्ञानम् । सम्(2)ज्ञानमेव । सम्(2)ज्ञानमिति
सम् – ज्ञानम् । एवास्मै । अस्मै पशुभिः । पशुभिः करोति ।
पशुभिरिति पशु – भिः । करोति पशुमान् । पशुमानेव । पशुमानिति
पशु – मान् । एव भवति । भवति चतस्रः । चतस्रः पुरस्तात् ।
पुरस्तादुप । उप दधाति । दधाति तस्मात् । तस्माच्चत्वारि । चत्वारि
चक्षुषः । चक्षुषो रूपाणि । रूपाणि द्वे । द्वे शुक्ले । द्वे इति द्वे ।
शुक्ले द्वे । शुक्ले इति शुक्ले । द्वे कृष्णे । द्वे इति द्वे ।
कृष्णे मूर्द्धन्वतीः । कृष्णे इति कृष्णे । **4** (**50/62**)

**TS 5.3.1.5 - Kramam**

मूर्द्धन्वतीर् भवन्ति । मूर्द्धन्वतीरिति मूर्द्धन्न्–वतीः । भवन्ति तस्मात् ।
तस्मात् पुरस्तात् । पुरस्तान् मूर्द्धा । मूर्द्धा पञ्च ।
पञ्च दक्षिणायाम् । दक्षिणाया॒ श्रोण्याम् । श्रोण्यामुप ।

उप दधाति । दधाति पञ्च । पञ्चोत्तरस्याम् । उत्तरस्याम् तस्मात् ।
उत्तरस्यामित्युत् – तरस्याम् । तस्मात् पश्चात् । पश्चाद् वर्.षीयान् ।
वर्.षीयान् पुरस्तात्प्रवणः । पुरस्तात्प्रवणः पशुः । पुरस्तात्प्रवण
इति पुरस्तात् – प्रवणः । पशुर् बस्तः । बस्तो वयः । वय इति ।
इति दक्षिणे । दक्षिणेऽ॒ꣳसे । अ॒ꣳस उप । उप दधाति । दधाति
वृष्णिः । वृष्णिर् वयः । वय इति । इत्युत्तरे । उत्तरेऽ॒ꣳसौ । उत्तर
इत्युत्–तरे । अ॒ꣳसावेव । एव प्रति । प्रति दधाति । दधाति व्याघ्रः ।
व्याघ्रो वयः । वय इति । इति दक्षिणे । दक्षिणे पक्षे । पक्ष उप ।
उप दधाति । दधाति सि॒ꣳहः । सि॒ꣳहो वयः । वय इति । इत्युत्तरे ।
उत्तरे पक्षयोः । उत्तर इत्युत् – तरे । पक्षयोरेव । एव वीर्यम् ।
वीर्यम् दधाति । दधाति पुरुषः । पुरुषो वयः । वय इति ( ) ।
इति मद्ध्ये । मद्ध्ये तस्मात् । तस्मात् पुरुषः । पुरुषः पशूनाम् ।
पशूनामधिपतिः । अधिपतिरित्यधि – पतिः ॥ **5** (**50/60**)

*(क्लृप्त्या – उपधाय – प्राणभृतः – समनसः – कृष्णो – पुरुषो वय इति – पञ्च च) (A1)*

**TS 5.3.2.1 - Kramam**

इन्द्राग्नी अव्यथमानाम् । इन्द्राग्नी इतीन्द्र – अग्नी ।
अव्यथमानामिति । इति स्वयमातृण्णाम् । स्वयमातृण्णामुप ।
स्वयमातृण्णामिति स्वयम् – आतृण्णाम् । उप दधाति ।
दधातीन्द्राग्निभ्याम् । इन्द्राग्निभ्याम् वै ।
इन्द्राग्निभ्यामितीन्द्राग्नि – भ्याम् । वा इमौ । इमौ लोकौ ।
लोकौ विधृतौ । विधृतावनयोः । विधृताविति वि – धृतौ । अनयोर्
लोकयोः । लोकयोर् विधृत्यै । विधृत्या अधृता । विधृत्या इति
वि–धृत्यै । अधृतेव । इव वै । वा एषा । एषा यत् । यन् मद्ध्यमा ।
मद्ध्यमा चितिः । चितिरन्तरिक्षम् । अन्तरिक्षमिव । इव वै ।
वा एषा । एषेन्द्राग्नी । इन्द्राग्नी इति । इन्द्राग्नी इतीन्द्र – अग्नी ।
इत्याह । आहेन्द्राग्नी । इन्द्राग्नी वै । इन्द्राग्नी इतीन्द्र – अग्नी ।
वै देवानाम् । देवानामोजोभृतौ । ओजोभृतावोजसा ।
ओजोभृतावित्योजः – भृतौ । ओजसैव । एवैनाम् । एनामन्तरिक्षे ।
अन्तरिक्षे चिनुते । चिनुते धृत्यै । धृत्यै स्वयमातृण्णाम् ।
स्वयमातृण्णामुप । स्वयमातृण्णामिति स्वयम् – आतृण्णाम् ।

उप दधाति । दधात्यन्तरिक्षम् । अन्तरिक्षम् ँवै । वै स्वयमातृण्णा ।
स्वयमातृण्णाऽन्तरिक्षम् । स्वयमातृण्णेति स्वयम् – आतृण्णा ।
अन्तरिक्षमेव । एवोप । उप धत्ते । धत्तेऽश्वम् । अश्वमुप ।
उप घ्रापयति । **6 (50/60)**

**TS 5.3.2.2 - Kramam**

घ्रापयति प्राणम् । प्राणमेव । प्राणमिति प्र – अनम् । एवास्याम् ।
अस्याम् दधाति । दधात्यथो । अथो प्राजापत्यः । अथो इत्यथो ।
प्राजापत्यो वै । प्राजापत्य इति प्राजा – पत्यः । वा अश्वः । अश्वः
प्रजापतिना । प्रजापतिनैव । प्रजापतिनेति प्रजा–पतिना । एवाग्निम् ।
अग्निम् चिनुते । चिनुते स्वयमातृण्णा । स्वयमातृण्णा भवति ।
स्वयमातृण्णेति स्वयम् – आतृण्णा । भवति प्राणानाम् ।
प्राणानामुथ्सृष्ट्यै । प्राणानामिति प्र – अनानाम् । उथ्सृष्ट्या अथो ।
उथ्सृष्ट्या इत्युत् – सृष्ट्यै । अथो सुवर्गस्य । अथो इत्यथो ।
सुवर्गस्य लोकस्य । सुवर्गस्येति सुवः–गस्य । लोकस्यानुख्यात्यै ।
अनुख्यात्यै देवानाम् । अनुख्यात्या इत्यनु – ख्यात्यै । देवानाम् ँवै ।
वै सुवर्गम् । सुवर्गम् ँलोकम् । सुवर्गमिति सुवः – गम् ।

लोकम् यताम् । यताम् दिशः । दिशः सम् । समव्लीयन्त ।
अव्लीयन्त ते । त एताः । एता दिश्याः । दिश्या अपश्यन् ।
अपश्यन् ताः । ता उप । उपादधत । अदधत ताभिः । ताभिर् वै ।
वै ते । ते दिशः । दिशोऽदृꣳहन्न् । अदृꣳहन् यत् । यद् दिश्याः ।
दिश्या उपदधाति । उपदधाति दिशाम् । उपदधातीत्युप – दधाति ।
दिशाम् विधृत्यै । विधृत्यै दश । विध्यत्या इति वि – धृत्यै ।
दश प्राणभृतः । प्राणभृतः पुरस्तात् । प्राणभृत इति प्राण – भृतः ।
पुरस्तादुप । उप दधाति । **7 (50/64)**

**TS 5.3.2.3 - Kramam**

दधाति नव । नव वै । वै पुरुषे । पुरुषे प्राणाः । प्राणा नाभिः ।
प्राणा इति प्र–अनाः । नाभिर् दशमी । दशमी प्राणान् । प्राणानेव ।
प्राणानिति प्र – अनान् । एव पुरस्तात् । पुरस्ताद् धत्ते । धत्ते
तस्मात् । तस्मात् पुरस्तात् । पुरस्तात् प्राणाः । प्राणा ज्योतिष्मतीम् ।
प्राणा इति प्र – अनाः । ज्योतिष्मतीमुत्तमाम् । उत्तमामुप ।
उत्तमामित्युत् – तमाम् । उप दधाति । दधाति तस्मात् ।

तस्मात् प्राणानाम् । प्राणानाम् ँवाक् । प्राणानामिति प्र – अनानाम् ।
वाग् ज्योतिः । ज्योतिरुत्तमा । उत्तमा दश । उत्तमेत्युत् – तमा ।
दशोप । उप दधाति । दधाति दशाक्षरा । दशाक्षरा विराट् ।
दशाक्षरेति दश – अक्षरा । विराड् विराट् । विराडिति वि – राट् ।
विराट् छन्दसाम् । विराडिति वि–राट् । छन्दसाम् ज्योतिः । ज्योतिर्
ज्योतिः । ज्योतिरेव । एव पुरस्तात् । पुरस्ताद् धत्ते । धत्ते तस्मात् ।
तस्मात् पुरस्तात् । पुरस्ताज् ज्योतिः । ज्योतिरुप । उपास्महे ।
आस्महे छन्दाꣳसि । छन्दाꣳसि पशुषु । पशुष्वाजिम् । आजिमयुः ।
अयुस्तान् । तान् बृहती । बृहत्युत् । उदजयत् । अजयत् तस्मात् ।
तस्माद् बार्.हताः । बार्.हताः पशवः । **8 (50/59)**

**TS 5.3.2.4 - Kramam**

पशव उच्यन्ते । उच्यन्ते मा । मा छन्दः । छन्द इति । इति दक्षिणतः ।
दक्षिणत उप । उप दधाति । दधाति तस्मात् । तस्माद् दक्षिणावृतः ।
दक्षिणावृतो मासाः । दक्षिणावृत इति दक्षिणा – आवृतः । मासाः
पृथिवी । पृथिवी छन्दः । छन्द इति । इति पश्चात् । पश्चात् प्रतिष्ठित्यै ।
प्रतिष्ठित्या अग्निः । प्रतिष्ठित्या इति प्रति – स्थित्यै । अग्निर् देवता ।

देवतेति । इत्युत्तरतः । उत्तरत ओजः । उत्तरत इत्युत् – तरतः । ओजो वै । वा अग्निः । अग्निरोजः । ओज एव । एवोत्तरतः । उत्तरतो धत्ते । उत्तरत इत्युत् – तरतः । धत्ते तस्मात् । तस्मादुत्तरतोऽभिप्रयायी । उत्तरतोऽभिप्रयायी जयति । उत्तरतोऽभिप्रयायीत्युत्तरतः – अभिप्रयायी । जयति षट्त्रि॒ꣳशत् । षट्त्रि॒ꣳशथ् सम् । षट्त्रि॒ꣳशदिति षट्–त्रि॒ꣳशत् । सम्पद्यन्ते । पद्यन्ते षट्त्रि॒ꣳशदक्षरा । षट्त्रि॒ꣳशदक्षरा बृहती । षट्त्रि॒ꣳशदक्षरेति षट्त्रि॒ꣳशत् – अक्षरा । बृहती बार्.हताः । बार्.हताः पशवः । पशवो बृहत्या । बृहत्यैव । एवास्मै । अस्मै पशून् । पशूनव । अव रुन्धे । रुन्धे बृहती । बृहती छन्दसाम् । छन्दसा॒ꣳ स्वाराज्यम् । स्वाराज्यम् परि । स्वाराज्यमिति स्व–राज्यम् । परीयाय । इयाय यस्य । यस्यैताः ( ) । एता उपधीयन्ते । **9 (50/58)**

**<u>TS 5.3.2.5 - Kramam</u>**

उपधीयन्ते गच्छति । उपधीयन्त इत्युप – धीयन्ते । गच्छति स्वाराज्यम् । स्वाराज्य॒ꣳ सप्त । स्वाराज्यमिति स्व – राज्यम् । सप्त वालखिल्याः । वालखिल्याः पुरस्तात् । वालखिल्या इति वाल – खिल्याः । पुरस्तादुप । उप दधाति । दधाति सप्त ।

सप्त पश्चात् । पश्चाथ् सप्त । सप्त वै । वै शीर्.षण्याः । शीर्.षण्याः प्राणाः । प्राणा द्वौ । प्राणा इति प्र – अनाः । द्वाववाञ्चौ । अवाञ्चौ प्राणानाम् । प्राणानाꣳ सवीर्यत्वाय । प्राणानामिति प्र – अनानाम् । सवीर्यत्वाय मूर्द्धा । सवीर्यत्वायेति सवीर्य – त्वाय । मूर्द्धा असि । असि राट् । राडिति । इति पुरस्तात् । पुरस्तादुप । उप दधाति । दधाति यन्त्री । यन्त्री राट् । राडिति । इति पश्चात् । पश्चात् प्राणान् । प्राणानेव । प्राणानिति प्र – अनान् । एवास्मै । अस्मै समीचः । समीचो दधाति । दधातीति दधाति ॥ **10** (**34/41**) ***(अश्वमुप – पुरस्तादुप – बार्.हता – एता – श्चतुस्त्रिꣳशच्च) (A2)***

**<u>TS 5.3.3.1 - Kramam</u>**

देवा वै । वै यत् । यद् यज्ञे । यज्ञेऽकुर्वत । अकुर्वत तत् । तदसुराः । असुरा अकुर्वत । अकुर्वत ते । ते देवाः । देवा एताः । एता अक्ष्णयास्तोमीयाः । अक्ष्णयास्तोमीया अपश्यन्न् । अक्ष्णयास्तोमीया इत्यक्ष्णया – स्तोमीयाः । अपश्यन् ताः । ता अन्यथा । अन्यथाऽनूच्य । अनूच्यान्यथा । अनूच्येत्यनु – उच्य । अन्यथोप । उपादधत । अदधत तत् । तदसुराः । असुरा न । नान्ववायन्न् ।

अन्ववायन् ततः । अन्ववायन्नित्यनु – अवायन्न् । ततो देवाः ।
देवा अभवन्न् । अभवन् परा । पराऽसुराः । असुरा यत् ।
यदक्ष्णयास्तोमीयाः । अक्ष्णयास्तोमीया अन्यथा । अक्ष्णयास्तोमीया
इत्यक्ष्णया – स्तोमीयाः । अन्यथाऽनूच्य । अनूच्यान्यथा ।
अनूचेत्यनु – उच्य । अन्यथोपदधाति । उपदधाति भ्रातृव्याभिभूत्यै ।
उपदधातीत्युप – दधाति । भ्रातृव्याभिभूत्यै भवति । भ्रातृव्याभिभूत्या
इति भ्रातृव्य – अभिभूत्यै । भवत्यात्मना । आत्मना परा । पराऽस्य ।
अस्य भ्रातृव्यः । भ्रातृव्यो भवति । भवत्याशुः । आशुस्त्रिवृत् ।
त्रिवृदिति । त्रिवृदिति त्रि – वृत् । इति पुरस्तात् । पुरस्तादुप ।
उप दधाति । दधाति यज्ञमुखम् । यज्ञमुखम् ँवै ।
यज्ञमुखमिति यज्ञ – मुखम् । वै तिवृत् । तिवृद् यज्ञमुखम् ।
त्रिवृदिति त्रि – वृत् । **11 (50/60)**

**<u>TS 5.3.3.2 - Kramam</u>**

यज्ञमुखमेव । यज्ञमुखमिति यज्ञ – मुखम् । एव पुरस्तात् । पुरस्ताद्
वि । वि यातयति । यातयति व्योम । व्योम सप्तदशः । व्योमेति
वि – ओम । सप्तदश इति । सप्तदश इति सप्त – दशः ।

इति दक्षिणतः । दक्षिणतोऽन्नम् । अन्नम् वै । वै व्योम । व्योमान्नम् ।
व्योमेति वि – ओम । अन्नꣳ सप्तदशः । सप्तदशोऽन्नम् । सप्तदश
इति सप्त – दशः । अन्नमेव । एव दक्षिणतः । दक्षिणतो धत्ते ।
धत्ते तस्मात् । तस्माद् दक्षिणेन । दक्षिणेनान्नम् । अन्नमद्यते ।
अद्यते धरुणः । धरुण एकविꣳशः । एकविꣳश इति । एकविꣳश
इत्येक – विꣳशः । इति पश्चात् । पश्चात् प्रतिष्ठा । प्रतिष्ठा वै ।
प्रतिष्ठेति प्रति – स्था । वा एकविꣳशः । एकविꣳशः प्रतिष्ठित्यै ।
एकविꣳश इत्येक – विꣳशः । प्रतिष्ठित्यै भान्तः । प्रतिष्ठित्या इति
प्रति – स्थित्यै । भान्तः पञ्चदशः । पञ्चदश इति । पञ्चदश इति
पञ्च – दशः । इत्युत्तरतः । उत्तरत ओजः । उत्तरत इत्युत्–तरतः ।
ओजो वै । वै भान्तः । भान्त ओजः । ओजः पञ्चदशः । पञ्चदश
ओजः । पञ्चदश इति पञ्च – दशः । ओज एव । एवोत्तरतः ।
उत्तरतो धत्ते । उत्तरत इत्युत् – तरतः । धत्ते तस्मात् ।
तस्मादुत्तरतोऽभिप्रयायी । उत्तरतोभिप्रयायी जयति ।
उत्तरतोभिप्रयायीत्युत्तरतः – अभिप्रयायी । जयति प्रतूर्तिः ।

प्रतूर्तिरष्टादशः । प्रतूर्तिरिति प्र – तूर्तिः । अष्टादश इति ।

अष्टादश इत्यष्टा – दशः । इति पुरस्तात् । पुरस्तादुप । 12 (50/66)

**TS 5.3.3.3 - Kramam**

उप दधाति । दधाति द्वौ । द्वौ त्रिवृतौ । त्रिवृतावभिपूर्वम् । त्रिवृताविति

त्रि – वृतौ । अभिपूर्वम् यज्ञमुखे । अभिपूर्वमित्यभि – पूर्वम् ।

यज्ञमुखे वि । यज्ञमुख इति यज्ञ – मुखे । वि यातयति ।

यातयत्यभिवर्तः । अभिवर्तः सविꣳशः । अभिवर्त इत्यभि – वर्तः ।

सविꣳश इति । सविꣳश इति स – विꣳशः । इति दक्षिणतः ।

दक्षिणतोऽन्नम् । अन्नम् वै । वा अभिवर्तः । अभिवर्तोऽन्नम् ।

अभिवर्त इत्यभि – वर्तः । अन्नꣳ सविꣳशः । सविꣳशोऽन्नम् ।

सविꣳश इति स – विꣳशः । अन्नमेव । एव दक्षिणतः । दक्षिणतो

धत्ते । धत्ते तस्मात् । तस्माद् दक्षिणेन । दक्षिणेनान्नम् । अन्नमद्यते ।

अद्यते वर्चः । वर्चो द्वाविꣳशः । द्वाविꣳश इति । इति पश्चात् ।

पश्चाद् यत् । यद् विꣳशतिः । विꣳशतिर् द्वे । द्वे तेन । द्वे इति द्वे ।

तेन विराजौ । विराजौ यत् । विराजाविति वि – राजौ । यद् द्वे ।

द्वे प्रतिष्ठा । द्वे इति द्वे । प्रतिष्ठा तेन । प्रतिष्ठेति प्रति – स्था ।

तेन विराजोः । विराजोरेव । विराजोरिति वि–राजोः । एवाभिपूर्वम् ।

अभिपूर्वमन्नाद्ये । अभिपूर्वमित्यभि – पूर्वम् । अन्नाद्ये प्रति ।

अन्नाद्य इत्यन्न – अद्ये । प्रति तिष्ठति । तिष्ठति तपः । तपो नवदशः ।

नवदश इति । नवदश इति नव – दशः । इत्युत्तरतः ।

उत्तरत स्तस्मात् । उत्तरत इत्युत् – तरतः । तस्माथ् सव्यः ।

सव्यो हस्तयोः । **13 (50/66)**

**<u>TS 5.3.3.4 - Kramam</u>**

हस्तयोस्तपस्वितरः । तपस्वितरो योनिः । तपस्वितर इति

तपस्वि – तरः । योनिश्चतुर्विꣳशः । चतुर्विꣳश इति । चतुर्विꣳश

इति चतुः – विꣳशः । इति पुरस्तात् । पुरस्तादुप । उप दधाति ।

दधाति चतुर्विꣳशत्यक्षरा । चतुर्विꣳशत्यक्षरा गायत्री ।

चतुर्विꣳशत्यक्षरेति चतुर्विꣳशति – अक्षरा । गायत्री गायत्री । गायत्री

यज्ञमुखम् । यज्ञमुखम् यँज्ञमुखम् । यज्ञमुखमिति यज्ञ – मुखम् ।

यज्ञमुखमेव । यज्ञमुखमिति यज्ञ – मुखम् । एव पुरस्तात् ।

पुरस्ताद् वि । वि यातयति । यातयति गर्भाः । गर्भाः पञ्चविꣳशः ।

पञ्चवि॒ꣳश इति । पञ्चवि॒ꣳश इति पञ्च – वि॒ꣳशः । इति दक्षिणतः । दक्षिणतोऽन्नम् । अन्नम् वै । वै गर्भाः । गर्भा अन्नम् । अन्नम् पञ्चवि॒ꣳशः । पञ्चवि॒ꣳशोऽन्नम् । पञ्चवि॒ꣳश इति पञ्च – वि॒ꣳशः । अन्नमेव । एव दक्षिणतः । दक्षिणतो धत्ते । धत्ते तस्मात् । तस्माद् दक्षिणेन । दक्षिणेनान्नम् । अन्नमद्यते । अद्यत ओजः । ओजस्त्रिणवः । त्रिणव इति । त्रिणव इति त्रि – नवः । इति पश्चात् । पश्चादिमे । इमे वै । वै लोकाः । लोकास्त्रिणवः । त्रिणव एषु । त्रिणव इति त्रि – नवः । एष्वेव । एव लोकेषु । लोकेषु प्रति । प्रति तिष्ठति । तिष्ठति सम्भरणः । सम्भरण स्त्रयोवि॒ꣳशः । सम्भरण इति सम् – भरणः । त्रयोवि॒ꣳश इति । त्रयोवि॒ꣳश इति त्रयः – वि॒ꣳशः । इत्युत्तरतः । **14 (50/61)**

**TS 5.3.3.5 - Kramam**

उत्तरतस्तस्मात् । उत्तरत इत्युत् – तरतः । तस्माथ् सव्यः । सव्यो हस्तयोः । हस्तयोः सम्भार्यतरः । सम्भार्यतरः क्रतुः । सम्भार्यतर इति सम्भार्य – तरः । क्रतुरेकत्रि॒ꣳशः । एकत्रि॒ꣳश इति ।

एकत्रि॒ꣳश इत्येक - त्रि॒ꣳशः । इति पुरस्तात् । पुरस्तादुप ।
उप दधाति । दधाति वाक् । वाग् वै । वै क्रतुः । क्रतुर् यज्ञमुखम् ।
यज्ञमुखम् ँवाक् । यज्ञमुखमिति यज्ञ - मुखम् । वाग् यज्ञमुखम् ।
यज्ञमुखमेव । यज्ञमुखमिति यज्ञ - मुखम् । एव पुरस्तात् ।
पुरस्ताद् वि । वि यातयति । यातयति ब्रद्ध्नस्य । ब्रद्ध्नस्य विष्टपम् ।
विष्टपम् चतुस्त्रिꣳशः । चतुस्त्रिꣳश इति । चतुस्त्रिꣳश इति
चतुः - त्रिꣳशः । इति दक्षिणतः । दक्षिणतोऽसौ । असौ वै ।
वा आदित्यः । आदित्यो ब्रद्ध्नस्य । ब्रद्ध्नस्य विष्टपम् । विष्टपम्
ब्रह्मवर्चसम् । ब्रह्मवर्चसमेव । ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् ।
एव दक्षिणतः । दक्षिणतो धत्ते । धत्ते तस्मात् । तस्माद् दक्षिणः ।
दक्षिणोऽर्द्धः । अर्द्धो ब्रह्मवर्चसितरः । ब्रह्मवर्चसितरः प्रतिष्ठा ।
ब्रह्मवर्चसितर इति ब्रह्मवर्चसि - तरः । प्रतिष्ठा त्रयस्त्रिꣳशः ।
प्रतिष्ठेति प्रति - स्था । त्रयस्त्रिꣳश इति । त्रयस्त्रिꣳश इति
त्रयः - त्रिꣳशः । इति पश्चात् । पश्चात् प्रतिष्ठित्यै । प्रतिष्ठित्यै नाकः ।
प्रतिष्ठित्या इति प्रति - स्थित्यै । नाकष्षट्त्रिꣳशः । षट्त्रिꣳश इति ।

षट्त्रिꣳश इति षट् – त्रिꣳशः । इत्युत्तरतः । उत्तरतः सुवर्गः ।
उत्तरत इत्युत् – तरतः । सुवर्गो वै ( ) । सुवर्ग इति सुवः – गः ।
वै लोकः । लोको नाकः । नाकः सुवर्गस्य । सुवर्गस्य लोकस्य ।
सुवर्गस्येति सुवः – गस्य । लोकस्य समष्ट्यै ।
समष्ट्या इति सम् – अष्ट्यै ॥ **15 (55/71)**

***(वै त्रिवृ – दिति पुरस्ताथ् – सव्य – स्त्रयोविꣳश इति – सुवर्गो वै – पञ्च च) (A3)***

**TS 5.3.4.1 - Kramam**

अग्नेर् भागः । भागोऽसि । असीति । इति पुरस्तात् । पुरस्तादुप ।
उप दधाति । दधाति यज्ञमुखम् । यज्ञमुखम् ँवै । यज्ञमुखमिति
यज्ञ – मुखम् । वा अग्निः । अग्निर् यज्ञमुखम् । यज्ञमुखम् दीक्षा ।
यज्ञमुखमिति यज्ञ – मुखम् । दीक्षा यज्ञमुखम् । यज्ञमुखम् ब्रह्म ।
यज्ञमुखमिति यज्ञ – मुखम् । ब्रह्म यज्ञमुखम् । यज्ञमुखम् त्रिवृत् ।
यज्ञमुखमिति यज्ञ – मुखम् । त्रिवृद् यज्ञमुखम् । त्रिवृदिति
त्रि – वृत् । यज्ञमुखमेव । यज्ञमुखमिति यज्ञ – मुखम् ।
एव पुरस्तात् । पुरस्ताद् वि । वि यातयति । यातयति नृचाक्षसाम् ।

नृचक्षसाम् भागः । नृचक्षसामिति नृ - चक्षसाम् । भागोऽसि ।
असीति । इति दक्षिणतः । दक्षिणतः शुश्रुवा॒ꣳसः । शुश्रुवा॒ꣳसो वै ।
वै नृचक्षसः । नृचक्षसोऽन्नम् । नृचक्षस इति नृ - चक्षसः ।
अन्नम् धाता । धाता जाताय । जातायैव । एवास्मै । अस्मा अन्नम् ।
अन्नमपि । अपि दधाति । दधाति तस्मात् । तस्माज् जातः ।
जातोऽन्नम् । अन्नमत्ति । अत्ति जनित्रम् । जनित्रꣳ स्पृतम् ।
स्पृतꣳ सप्तदशः । सप्तदशः स्तोमः । सप्तदश इति सप्त - दशः ।
स्तोम इति । इत्याह । आहान्नम् । अन्नम् ँवै । वै जनित्रम् ।
जनित्रमन्नम् । **16 (50/59)**

**<u>TS 5.3.4.2 - Kramam</u>**

अन्नꣳ सप्तदशः । सप्तदशोऽन्नम् । सप्तदश इति सप्त - दशः ।
अन्नमेव । एव दक्षिणतः । दक्षिणतो धत्ते । धत्ते तस्मात् । तस्माद्
दक्षिणेन । दक्षिणेनान्नम् । अन्नमद्यते । अद्यते मित्रस्य । मित्रस्य
भागः । भागोऽसि । असीति । इति पश्चात् । पश्चात् प्राणः ।
प्राणो वै । प्राण इति प्र - अनः । वै मित्रः । मित्रोऽपानः ।
अपानो वरुणः । अपान इत्यप - अनः । वरुणः प्राणापानौ ।

प्राणापानावेव । प्राणापानाविति प्राण – अपानौ । एवास्मिन्न् ।
अस्मिन् दधाति । दधाति दिवः । दिवो वृष्टिः । वृष्टिर् वाताः । वाताः
स्पृताः । स्पृता एकवि॒ꣳशः । एकवि॒ꣳशः स्तोमः । एकवि॒ꣳश
इत्येक–वि॒ꣳशः । स्तोम इति । इत्याह । आह प्रतिष्ठा । प्रतिष्ठा वै ।
प्रतिष्ठेति प्रति – स्था । वा एकवि॒ꣳशः । एकवि॒ꣳशः प्रतिष्ठित्यै ।
एकवि॒ꣳश इत्येक – वि॒ꣳशः । प्रतिष्ठित्या इन्द्रस्य । प्रतिष्ठित्या इति
प्रति – स्थित्यै । इन्द्रस्य भागः । भागोऽसि । असीति । इत्युत्तरतः ।
उत्तरत ओजः । उत्तरत इत्युत् – तरतः । ओजो वै । वा इन्द्रः ।
इन्द्र ओजः । ओजो विष्णुः । विष्णुरोजः । ओजः क्षत्रम् ।
क्षत्रमोजः । ओजः पञ्चदशः । पञ्चदश ओजः ।
पञ्चदश इति पञ्च – दशः । **17 (50/60)**

**TS 5.3.4.3 - Kramam**

ओज एव । एवोत्तरतः । उत्तरतो धत्ते । उत्तरत इत्युत् – तरतः ।
धत्ते तस्मात् । तस्मादुत्तरतोऽभिप्रयायी । उत्तरतोऽभिप्रयायी जयति ।
उत्तरतोऽभिप्रयायीत्युत्तरतः – अभिप्रयायी । जयति वसूनाम् ।
वसूनाम् भागः । भागोऽसि । असीति । इति पुरस्तात् । पुरस्तादुप ।

उप दधाति । दधाति यज्ञमुखम् । यज्ञमुखम् वै । यज्ञमुखमिति यज्ञ - मुखम् । वै वसवः । वसवो यज्ञमुखम् । यज्ञमुख(ग्म्) रुद्राः । यज्ञमुखमिति यज्ञ - मुखम् । रुद्रा यज्ञमुखम् । यज्ञमुखम् चतुर्वि(ग्ं)शः । यज्ञमुखमिति यज्ञ - मुखम् । चतुर्वि(ग्ं)शो यज्ञमुखम् । चतुर्वि(ग्ं)श इति चतुः-वि(ग्ं)शः । यज्ञमुखमेव । यज्ञमुखमिति यज्ञ - मुखम् । एव पुरस्तात् । पुरस्ताद् वि । वि यातयति । यातयत्यादित्यानाम् । आदित्यानाम् भागः । भागोऽसि । असीति । इति दक्षिणतः । दक्षिणतोऽन्नम् । अन्नम् वै । वा आदित्याः । आदित्या अन्नम् । अन्नम् मरुतः । मरुतोऽन्नम् । अन्नम् गर्भाः । गर्भा अन्नम् । अन्नम् पञ्चवि(ग्ं)शः । पञ्चवि(ग्ं)शोऽन्नम् । पञ्चवि(ग्ं)श इति पञ्च - वि(ग्ं)शः । अन्नमेव । एव दक्षिणतः । दक्षिणतो धत्ते । धत्ते तस्मात् । तस्माद् दक्षिणेन । दक्षिणेनान्नम् । अन्नमद्यते । अद्यतेऽदित्यै । अदित्यै भागः । भागोऽसि । **18 (50/58)**

**TS 5.3.4.4 - Kramam**

असीति । इति पश्चात् । पश्चात् प्रतिष्ठा । प्रतिष्ठा वै । प्रतिष्ठेति प्रति - स्था । वा अदितिः । अदितिः प्रतिष्ठा । प्रतिष्ठा पूषा ।

प्रतिष्ठेति प्रति – स्था । पूषा प्रतिष्ठा । प्रतिष्ठा त्रिणवः । प्रतिष्ठेति
प्रति – स्था । त्रिणवः प्रतिष्ठित्यै । त्रिणव इति त्रि – नवः ।
प्रतिष्ठित्यै देवस्य । प्रतिष्ठित्या इति प्रति–स्थित्यै । देवस्य सवितुः ।
सवितुर् भागः । भागोऽसि । असीति । इत्युत्तरतः । उत्तरतो ब्रह्म ।
उत्तरत इत्युत् – तरतः । ब्रह्म वै । वै देवः । देवः सविता ।
सविता ब्रह्म । ब्रह्म बृहस्पतिः । बृहस्पतिर् ब्रह्म । ब्रह्म चतुष्टोमः ।
चतुष्टोमो ब्रह्मवर्चसम् । चतुष्टोम इति चतुः–स्तोमः । ब्रह्मवर्चसमेव ।
ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । एवोत्तरतः । उत्तरतो धत्ते ।
उत्तरत इत्युत् – तरतः । धत्ते तस्मात् । तस्मादुत्तरः । उत्तरोऽर्द्धः ।
उत्तर इत्युत् – तरः । अर्द्धो ब्रह्मवर्चसितरः । ब्रह्मवर्चसितरः
सावित्रवती । ब्रह्मवर्चसितर इति ब्रह्मवर्चसि – तरः । सावित्रवती
भवति । सावित्रवतीति सावित्र – वती । भवति प्रसूत्यै ।
प्रसूत्यै तस्मात् । प्रसूत्या इति प्र – सूत्यै । तस्माद् ब्राह्मणानाम् ।
ब्राह्मणानामुदीची । उदीची सनिः । सनिः प्रसूता । प्रसूता धर्त्रः ।
प्रसूतेति प्र – सूता । धर्त्रश्चतुष्टोमः । चतुष्टोम इति ।

चतुष्टोम इति चतुः - स्तोमः । इति पुरस्तात् । पुरस्तादुप ।
उप दधाति । दधाति यज्ञमुखम् । यज्ञमुखम् ँवै । यज्ञमुखमिति
यज्ञ - मुखम् । वै धर्त्रः । धर्त्रो यज्ञमुखम् । **19 (50/66)**

**TS 5.3.4.5 - Kramam**

यज्ञमुखम् चतुष्टोमः । यज्ञमुखमिति यज्ञ - मुखम् । चतुष्टोमो
यज्ञमुखम् । चतुष्टोम इति चतुः - स्तोमः । यज्ञमुखमेव ।
यज्ञमुखमिति यज्ञ - मुखम् । एव पुरस्तात् । पुरस्ताद् वि ।
वि यातयति । यातयति यावानाम् । यावानाम् भागः । भागोऽसि ।
असीति । इति दक्षिणतः । दक्षिणतो मासाः । मासा वै । वै यावाः ।
यावा अर्द्धमासाः । अर्द्धमासा अयावाः । अर्द्धमासा
इत्यर्द्ध-मासाः । अयावास्तस्मात् । तस्माद् दक्षिणावृतः । दक्षिणावृतो
मासाः । दक्षिणावृत इति दक्षिणा - आवृतः । मासा अन्नम् ।
अन्नम् ँवै । वै यावाः । यावा अन्नम् । अन्नम् प्रजाः । प्रजा अन्नम् ।
प्रजा इति प्र - जाः । अन्नमेव । एव दक्षिणतः । दक्षिणतो धत्ते ।
धत्ते तस्मात् । तस्माद् दक्षिणेन । दक्षिणेनान्नम् । अन्नमध्यते ।
अध्यत ऋभूणाम् । ऋभूणाम् भागः । भागोऽसि । असीति ।

इति पश्चात् । पश्चात् प्रतिष्ठित्यै । प्रतिष्ठित्यै विवर्तः । प्रतिष्ठित्या इति प्रति – स्थित्यै । विवर्तोऽष्टाचत्वारि॒ꣳशः । विवर्त इति वि – वर्तः । अष्टाचत्वारि॒ꣳश इति । अष्टाचत्वारि॒ꣳश इत्यष्टा – चत्वारि॒ꣳशः । इत्युत्तरतः । उत्तरतोऽनयोः । उत्तरत इत्युत् – तरतः । अनयोर् लोकयोः । लोकयोः सवीर्यत्वाय । सवीर्यत्वाय तस्मात् । सवीर्यत्वायेति सवीर्य – त्वाय । तस्मादिमौ । इमौ लोकौ । लोकौ समावद्वीर्यौ । समावद्वीर्यौ यस्य । समावद्वीर्याविति समावत् – वीर्यौ । 20 (50/62)

**TS 5.3.4.6 - Kramam**

यस्य मुख्यवतीः । मुख्यवतीः पुरस्तात् । मुख्यवतीरिति मुख्य – वतीः । पुरस्तादुपधीयन्ते । उपधीयन्ते मुख्यः । उपधीयन्त इत्युप – धीयन्ते । मुख्य एव । एव भवति । भवत्या । आऽस्य । अस्य मुख्यः । मुख्यो जायते । जायते यस्य । यस्यान्नवतीः । अन्नवतीर् दक्षिणतः । अन्नवतीरित्यन्न – वतीः । दक्षिणतोऽत्ति । अत्यन्नम् । अन्नमा । आऽस्य । अस्यान्नादः । अन्नादो जायते । अन्नाद इत्यन्न – अदः । जायते यस्य । यस्य प्रतिष्ठावतीः ।

प्रतिष्ठावतीः पश्चात् । प्रतिष्ठावतीरिति प्रतिष्ठा – वतीः । पश्चात् प्रति ।

प्रत्येव । एव तिष्ठति । तिष्ठति यस्य । यस्यौजस्वतीः ।

ओजस्वतीरुत्तरतः । उत्तरत ओजस्वी । उत्तरत इत्युत् – तरतः ।

ओजस्व्येव । एव भवति । भवत्या । आऽस्य । अस्यौजस्वी ।

ओजस्वी जायते । जायतेऽर्कः । अर्को वै । वा एषः । एष यत् ।

यदग्निः । अग्निस्तस्य । तस्यैतत् । एतदेव । एव स्तोत्रम् ।

स्तोत्रमेतत् । एतच्छस्त्रम् । शस्त्रम् ँयत् । यदेषा । एषा विधा ।

विधा विधीयते । विधेति वि – धा । **21 (50/57)**

**TS 5.3.4.7 - Kramam**

विधीयतेऽर्के । विधीयत इति वि – धीयते । अर्क एव । एव तत् ।

तदर्क्यम् । अर्क्यमनु । अनु वि । वि धीयते । धीयतेऽत्ति ।

अत्यन्नम् । अन्नमा । आऽस्य । अस्यान्नादः । अन्नादो जायते ।

अन्नाद इत्यन्न – अदः । जायते यस्य । यस्यैषा । एषा विधा ।

विधा विधीयते । विधेति वि – धा । विधियते यः । विधीयत इति

वि – धीयते । य उ । उ च । चैनाम् । एनामेवम् । एवम् ँवेद ।

वेद सृष्टीः । सृष्टीरुप । उप दधाति । दधाति यथासृष्टम् ।

यथासृष्टमेव । यथासृष्टमिति यथा – सृष्टम् । एवाव । अव रुन्धे ।
रुन्धे न । न वै । वा इदम् । इदम् दिवा । दिवा न । न नक्तम् ।
नक्तमासीत् । आसीदव्यावृत्तम् । अव्यावृत्तम् ते ।
अव्यावृत्तमित्यवि – आवृत्तम् । ते देवाः । देवा एताः । एता व्युष्टीः ।
व्युष्टीरपश्यन्न् । व्युष्टीरिति वि – उष्टीः । अपश्यन् ताः । ता उप ।
उपादधत । अदधत ततः । ततो वै । वा इदम् ( ) । इदम् ँवि ।
व्यौच्छत् । औच्छद् यस्य । यस्यैताः । एता उपधीयन्ते । उपधीयन्ते वि ।
उपधीयन्त इत्युप – धीयन्ते । व्येव । एवास्मै । अस्मा उच्छति ।
उच्छत्यथो । अथो तमः । अथो इत्यथो । तम एव । एवाप ।
अप हते । हत इति हते ॥ **22** (**64/73**)

***(वै जनित्रम् – पञ्चदशो –ऽदित्यै भागो – वै धर्त्रः – समावद्वीर्यै – विधा – ततो वा इदम् – चतुर्दश च) (A4)***

**<u>TS 5.3.5.1 - Kramam</u>**

अग्ने जातान् । जातान् प्र । प्रणुद । नुदा नः । नः सपत्नान् ।
सपत्नानिति । इति पुरस्तात् । पुरस्तादुप । उप दधाति । दधाति
जातान् । जातानेव । एव भ्रातृव्यान् । भ्रातृव्यान् प्र । प्रणुदते ।

नुदते सहसा । सहसा जातान् । जातानिति । इति पश्चात् । पश्चाज् जनिष्यमाणान् । जनिष्यमाणानेव । एव प्रति । प्रति नुदते । नुदते चतुश्चत्वारि॒ꣳशः । चतुश्चत्वारि॒ꣳशः स्तोमः । चतुश्चत्वारि॒ꣳश इति चतुः - चत्वारि॒ꣳशः । स्तोम इति । इति दक्षिणतः । दक्षिणतो ब्रह्मवर्चसम् । ब्रह्मवर्चसम् वै । ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् । वै चतुश्चत्वारि॒ꣳशः । चतुश्चत्वारि॒ꣳशो ब्रह्मवर्चसम् । चतुश्चत्वारि॒ꣳश इति चतुः - चत्वारि॒ꣳशः । ब्रह्मवर्चसमेव । ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् । एव दक्षिणतः । दक्षिणतो धत्ते । धत्ते तस्मात् । तस्माद् दक्षिणः । दक्षिणोऽर्द्धः । अर्द्धो ब्रह्मवर्चसितरः । ब्रह्मवर्चसितरः षोडशः । ब्रह्मवर्चसितर इति ब्रह्मवर्चसि - तरः । षोडशः स्तोमः । स्तोम इति । इत्युत्तरतः । उत्तरत ओजः । उत्तरत इत्युत् - तरतः । ओजो वै । वै षोडशः । षोडश ओजः । ओज एव । एवोत्तरतः । उत्तरतो धत्ते । उत्तरत इत्युत् - तरतः । धत्ते तस्मात् । तस्मादुत्तरतोभिप्रयायी । **23 (50/57)**

**TS 5.3.5.2 - Kramam**

उत्तरतोभिप्रयायी जयति । उत्तरतोभिप्रयायीत्युत्तरतः – अभिप्रयायी ।
जयति वज्रः । वज्रो वै । वै चतुश्चत्वारि॰ शः । चतुश्चत्वारि॰ शो
वज्रः । चतुश्चत्वारि॰ श इति चतुः – चत्वारि॰ शः । वज्रः षोडशः ।
षोडशो यत् । यदेते । एते इष्टके । एते इत्येते । इष्टके उपदधाति ।
इष्टके इतीष्टके । उपदधाति जातान् । उपदधातीत्युप – दधाति ।
जाता॰श्च । चैव । एव जनिष्यमाणान् । जनिष्यमाणा॰श्च ।
च भ्रातृव्यान् । भ्रातृव्यान् प्रणुद्य । प्रणुद्य वज्रम् । प्रणुद्येति
प्र – नुद्य । वज्रमनु । अनु प्र । प्र हरति । हरति स्तृत्यै । स्तृत्यै
पुरीषवतीम् । पुरीषवतीम् मद्ध्ये । पुरीषवतीमिति पुरीष – वतीम् ।
मद्ध्य उप । उप दधाति । दधाति पुरीषम् । पुरीषम् वै ।
वै मद्ध्यम् । मद्ध्यमात्मनः । आत्मनः सात्मानम् । सात्मानमेव ।
सात्मानमिति स – आत्मानम् । एवाग्निम् । अग्निम् चिनुते । चिनुते
सात्मा । सात्माऽमुष्मिन्न् । सात्मेति स – आत्मा । अमुष्मिन् ँल्लोके ।
लोके भवति । भवति यः । य एवम् । एवम् ँवेद । वेदैताः ।

एता वै । वा असपत्नाः । असपत्ना नाम । नामेष्टकाः ।
इष्टका यस्य । यस्यैताः । एता उपधीयन्ते । उपधीयन्ते न ।
उपधीयन्त इत्युप – धीयन्ते । **24 (50/60)**

**TS 5.3.5.3 - Kramam**

नास्य । अस्य सपत्नः । सपत्नो भवति । भवति पशुः । पशुर् वै ।
वा एषः । एष यत् । यदग्निः । अग्निर् विराजः । विराज उत्तमायाम् ।
विराज इति वि – राजः । उत्तमायाम् चित्याम् ।
उत्तमायामित्युत् – तमायाम् । चित्यामुप । उप दधाति । दधाति
विराजम् । विराजमेव । विराजमिति वि – राजम् । एवोत्तमाम् ।
उत्तमाम् पशुषु । उत्तमामित्युत् – तमाम् । पशुषु दधाति ।
दधाति तस्मात् । तस्मात् पशुमान् । पशुमानुत्तमाम् । पशुमानिति
पशु – मान् । उत्तमाम् ँवाचम् । उत्तमामित्युत् – तमाम् । वाचम्
ँवदति । वदति दशदश । दशदशोप । दशदशेति दश – दश ।
उप दधाति । दधाति सवीर्यत्वाय । सवीर्यत्वायाक्ष्णया ।
सवीर्यत्वायेति सवीर्य – त्वाय । अक्ष्णयोप । उप दधाति । दधाति
तस्मात् । तस्मादक्ष्णया । अक्ष्णया पशवः । पशवोऽङ्गानि ।

अङ्गानि प्र । प्र हरन्ति । हरन्ति प्रतिष्ठित्यै । प्रतिष्ठित्यै यानि ।
प्रतिष्ठित्या इति प्रति – स्थित्यै । यानि वै । वै छन्दाꣳसि ।
छन्दाꣳसि सुवर्ग्याणि । सुवर्ग्याण्यासन्न् । सुवर्ग्याणीति
सुवः – ग्यानि । आसन् तैः । तैर् देवाः । देवाः सुवर्गम् ।
सुवर्गम् ँलोकम् । सुवर्गमिति सुवः – गम् । लोकमायन्न् ।
आयन् तेन । तेनर्.षयः । ऋषयोऽश्राम्यन्न् । **25 (50/61)**

**<u>TS 5.3.5.4 - Kramam</u>**

अश्राम्यन् ते । ते तपः । तपोऽतप्यन्न् । अतप्यन् तानि । तानि तपसा ।
तपसाऽपश्यन्न् । अपश्यन् तेभ्यः । तेभ्य एताः । एता इष्टकाः ।
इष्टका निः । निरमिमत । अमिमतेवः । एवश्छन्दः । छन्दो वरिवः ।
वरिवश्छन्दः । छन्द इति । इति ताः । ता उप । उपादधत ।
अदधत ताभिः । ताभिर् वै । वै ते । ते सुवर्गम् । सुवर्गम् ँलोकम् ।
सुवर्गमिति सुवः – गम् । लोकमायन्न् । आयन् यत् । यदेताः ।
एता इष्टकाः । इष्टका उपदधाति । उपदधाति यानि ।
उपदधातीत्युप – दधाति । यान्येव । एव छन्दाꣳसि । छन्दाꣳसि
सुवर्ग्याणि । सुवर्ग्याणि तैः । सुवर्ग्याणीति सुवः – ग्यानि । तैरेव ।

एव यजमानः । यजमानः सुवर्गम् । सुवर्गम् ँलोकम् । सुवर्गमिति सुवः - गम् । लोकमेति । एति यज्ञेन । यज्ञेन वै । वै प्रजापतिः । प्रजापतिः प्रजाः । प्रजापतिरिति प्रजा - पतिः । प्रजा असृजत । प्रजा इति प्र - जाः । असृजत ताः । ताः स्तोमभागैः । स्तोमभागैरेव । स्तोमभागैरिति स्तोम - भागैः । एवासृजत । असृजत यत् ( ) । यथ् स्तोमभागाः । **26 (50/57)**

**TS 5.3.5.5 - Kramam**

